श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्री अपर्याप्तामृतविंशतिः ॥

*This document[*] has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

[*]This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री अपर्याप्तामृतविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

अपर्याप्तामृतस्वामिसपर्यासक्तचेतसाम्।
विपर्यासविहीनानां उपर्याशास्तु मे सदा॥ १ ॥

मधुरं मधुचित्रोत्थं
मधुजिन्मधु किञ्चन।
माधुरं माधुरं चापि
मे धुरं च वहत्यहो॥ २ ॥

शान्तं सन्मधुरं गभीरमनघं सौन्दर्यसारास्पदं
सर्वामोदविधायि चेतसि सपद्याविश्य संपश्यताम्।
श्रीभूभूषितपार्श्वभूमियुगलं सम्पूरयत्स्वं गृहं
चक्षुष्मत्तपसः फलं विजयते शार्ङ्गीति किञ्चिन्महः॥ ३ ॥

किं गेहैर्गलितैर्धनैरपि गतैः केदारजालैस्तथा
किं वा तैरपि वस्तुभिः प्रियतमैः यातैर्मनोहारिभिः।
बन्धुभ्यश्च समागतैः परिभवैः किं वा ममात्रागतम्
श्रीमत्कोमलवल्लिकासहचरं श्रीशार्ङ्गिणं पश्यतः॥ ४ ॥

शङ्खं चक्रमसिं गदामपि तथा शार्ङ्गं च धत्से समं
शार्ङ्गीत्येव तव प्रथेह धनुषा तत्केन न ज्ञायते।
ज्ञातं तद्भवतस्स्मितेन मृदुना भावान्वितेनाधुना
सम्प्राप्तं हि धनुष्पुरात् जनमिमं त्रातुं नतं मामिति॥ ५ ॥

अमृतममृत! दत्वा मोहिनीभावतस्त्वं
किमिति परिणतोऽभूः पुरुषस्सुन्दराङ्गः।

इदमिदमिति तत्त्वं पृष्ठतो देवदेव!
त्वयि विनिहितदृष्टिर्वक्त्यसौ कुम्भनाथः॥ ६॥

त्वय्याल्न्दभावाः किल कीर्तितास्ते
आल्वार् समाख्यास्तदिदं प्रसिद्धम्।
आल्वान् त्वमासी कथमेतदेवं
आल्वान् महीसारजसारवाचि॥ ७॥

कावेरीलहरीकणैरुपहृतैरभ्युक्षितो वायुना
कावेरीजलवर्धिताभिरभितः संवीजितश्शालिभिः।
कावेरीसलिलैरतीव मधुरैराप्लावितः पूजकैः
कावेरी बहुधा गतिं विदधतीं पश्यन्निवास्ते प्रभुः॥ ८॥

शेते कामपि कालमेघमधुरां मूर्तिं समादाय यः
कावेरीजलशीतलावनिसुखं भोक्तुं भुजङ्गाधिपे।
तिष्ठत्यद्भुतहेमरम्यसुतनुः पञ्चायुधीमण्डितः
कावेरीजलवर्धितावनिरुहां शोभां च यो वीक्षितुम्॥ ९॥

यः काले कलिकालदोषकलुषा वीथीश्च तास्तास्तथा
तत्रस्थाञ्च नरान् दृशा च गतिभिः सम्पावयन् सादरम्।
सञ्चारं वितनोति सायमपि च प्रातश्च मध्यन्दिने
तस्मै हन्त! दयाघनाय महते श्रीशार्ङ्गधाम्ने नम॥ १०॥

शेषे शयानस्तव पृष्ठभागे
त्वमेव भूयस्तनुरम्यभावम्।
आलोकितुं सादरमीषदेवम्
उत्थानभावं तनुषे मुखेन॥ ११॥

अमृतममृत! दातुं मोहिनीभावमिच्छन्
किमिति परिणतस्त्वं पूर्वमेवं पुमान् सन्।
अथ किल समये श्रीहेमनामा मुनिस्त्वां
सुभग इति विचिन्त्य स्वां सुतां ते स चादात्॥ १२॥

हेमाभिधानमुनिनाथतपःफलं त्वं
 हेमापगासुभगतीरभुवि स्थितस्सन्।
हेमाम्बुजातरमणीरमणीयपार्श्वः
 हे मां विलोकय दृशा दययाऽऽदरेण॥ १३ ॥

भवतो ममापि न भिदा मनागपि
 प्रियशार्ङ्गनाथ! सखिताऽस्तु तद्भृशम्।
तव च प्रसिद्धिरवनौ तथैव मे
 ननु पश्य चापलतयैव वर्धते॥ १४ ॥

स्वामिन्! चापलतागुणस्तव तथा लोके प्रसिद्धो बभौ
 दोषश्चापलता पुनर्मम तथा यद्यन्यथापि स्थितिः।
त्वामाश्रित्य गुणा भवन्ति भगवन्! दोषा अपीति स्थितं
 मामाश्रित्य गुणा अपीह नितरां दोषा भवन्तीति च॥ १५ ॥

तस्माच्चापलतां मयि स्थितिमतीं व्यावर्त्य दुर्मार्गतः
 त्वय्यीदृग्धुरे नियोज्य गुण इत्यानन्दयन् रक्ष माम्।
एवं चेत् त्वयि यद्विभाति तदिदं चातुर्यमव्याहतं
 क्षान्तिस्सा करुणाऽपि सा निरुपमा सर्वाभिनन्द्या भवेत्॥ १६ ॥

त्वयि प्लुतमना मुनिर्वकुलभूषणो या जगौ
 श्रुतावमृतवर्षणीरमृत! नाथ! गाथा दश।
मृता इव तिरोहिता ननु परास्सहस्राधिकाः
 स्वयं भुवि हिता हि ताः भृशमजीवयस्सर्वतः॥ १७ ॥

भवद्विषयिणीरिमा दश सहस्रमध्यस्थिताः
 पठन्ति भुवि ये नरा त इह कामभूताः मताः।
प्रिया हरिणचक्षुषामिति जगौ फलं चोचितं
 तवामृत! मम प्रभो! मधुरिमा कथं वर्ण्यते॥ १८ ॥

श्रान्तं त्रिविक्रमकृतावपि दण्डकायां
 वृन्दावने च मृदुलं तव पादपद्मम्।

पीताम्बरान्तपरिवीजितमद्य नाथ !
    मच्चित्तपद्मदलमध्यगतं विधेयाः॥ १९ ॥

मौलौ बलेर्विनिहितं विबुधद्विषोऽथ
    न्यक्कुर्वतः कविगिरं च हितं पदाब्जम्।
मौलौ ममाऽपि मधुसूदन ! तादृशस्य
    कोऽयं विलम्ब इह ते भगवन्! विधातुम्॥ २० ॥

बद्धं पदाम्बुजसमीपसमाश्रयं त्वं
    सारं दृशा कलयसे नितरामबद्धम्।
एनं जनं च कलयैवमिमं प्रबन्धं
    नैवं तथा कलय सोऽथ शुकं स्मरामि॥ २१ ॥

अज्ञोऽहं हितमेतदेतदहितं तस्मादिदं कार्यमि-
    त्येतन्नेति विविच्य वेदितुमहो का नाम शक्तिर्मम।
एकं त्वां शरणं गतोऽस्मि भगवन्! श्रीकोमलाम्बापते !
    यन्मे स्यादुचितं हितं तदखिलं कार्यं त्वयैव प्रभो !॥ २२ ॥

कनत्कनकपद्मिनीकमलवासिनीभूषणं
    मनोहरमुखाम्बुजं किमपि मञ्जुमन्दस्मितम्।
अभीतिमधुरं करं विनमतां पुरो दर्शयत्
    तदेतदमृताभिधं भवतु दैवतं श्रेयसे॥ २३ ॥

अपर्याप्तामृतस्वामिविषया श्रीनिधीरिता।
अपर्याप्तामृतात्मेयं विंशतिः शंसतां मुदे॥ २४ ॥

॥ इति श्री अपर्याप्तामृतविंशतिः समाप्ता ॥

www.prapatti.com